# CBSE Class 12 Sanskrit Core 2011 - 22/1 Set 2

## Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

**Time Allowed: 3 Hours** **Maximum Marks: 100**

### General Instructions

(i) अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

## Section खण्ड क — अपठितांश-अवबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन दीयन्ताम् -

लोभः मूलमनर्थानाम् इति सूक्तिः प्रसिद्धा। भर्तृहरिणा अपि कथितम् - यदि लोभः अस्ति, अन्यपातकैः किम्? यस्य मनः सन्तुष्टं न भवति, यश्च लोभी भवति, सः सर्वदा अधिकाधिकं वाञ्छति। सः कदापि शान्तिं न लभते। इच्छानां तु सीमा एव नास्ति। एका इच्छा पूर्णा भवति, अन्या उत्पन्ना भवति। यस्य समीपे एकं भवनम्, सः द्वितीयं वाञ्छति। निर्लोभी मनुष्यः यत् प्राप्नोति, तेन एव सन्तुष्टः भवति। लोभी मनुष्यः निःशङ्कः भूत्वा शयनं कर्तुम् अपि असमर्थः भवति। सर्वदा चिन्तया व्याकुलः भवति। उच्यते च - 'ये आशायाः दासाः, ते दासाः, सर्वलोकस्य आशा दासी येषां, तेषां दासायते लोकः।'

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) लोभी मनुष्यः सर्वदा कया व्याकुलः भवति? (ii) कासां सीमा नास्ति? (iii) लोभः केषां मूलम्? (iv) लोभी मनुष्यः कदापि कां न लभते?

(ब) पूर्णवाक्येन उत्तरत - (i) निर्लोभी मनुष्यः केन सन्तुष्टः भवति? (ii) लोकः केषां दासः भवति?

(स) यथानिर्देशम् उत्तरत - (i) 'वाञ्छति' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'सन्तुष्टम्' इति पदस्य विशेष्यं किम्? (iii) 'पुण्यैः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्? (iv) 'यस्य समीपे एकं भवनम्...' इति वाक्ये 'यस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(द) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।

## Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

**2.** भवान् सञ्जयः। भवतां मित्रं विजयः प्रायः अस्वस्थः वर्तते। तं बोधयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसाहाय्येन पूरयित्वा पत्रं पुनः लिखत।

राजकीयमहाविद्यालयः, व्यासछात्रावासः, रमेशनगरम्, दिल्ली।

तिथिः _____

प्रिय _____ (i)

नमोनमः। भवतां पत्रेण ज्ञातम् यत् _____ (ii) स्वास्थ्यं समीचीनं नास्ति। नूनं शरीरम् एव _____ (iii) प्रथमं साधनम्। मित्र! प्रायः अस्वस्थतायाः कारणं पाचनक्रियायां _____ (iv) भवति। मया चरकशास्त्रे पठितम् यद् यः _____ (v) भवति, ऋतोः अनुसारं च भुङ्क्ते, सः सर्वथा रोगमुक्तः भवति। अतः भवान् अपि _____ (vi) भोजनं कुर्यात्, उदरस्य चतुर्थः भागः सर्वदा _____ (vii) भवेत्, ऋतोः अनुसारं भोजनं स्वीकुरु। एवं सर्वदा रोगमुक्तः भविष्यसि।

भवताम् _____ (viii) अनेकाः शुभकामनाः। पितरौ _____ (ix) मम प्रणामाञ्जलिः निवेदनीयः।

भवतां प्रियसुहृत्, _____ (x)

मञ्जूषाः रिक्तः, विजय!, विकृतिः, स्वास्थ्यलाभाय, हितकरम्, धर्मस्य, प्रति, भवताम्, मितभुक्, सञ्जयः।

**3.** मञ्जूषाप्रदत्तशब्दसूचीमाध्यमेन अधोलिखितकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत -

कश्चित् श्रेष्ठिपुत्रः पितुः मृत्योः अनन्तरं तस्य धनस्य स्वामी भूत्वा धनस्य _____ (i) अकरोत्। ईदृशं किमपि पापं नासीत् यत् तेन न _____ (ii)। ईदृशं मादकद्रव्यं नासीत् यत् तेन न सेवितम्। एकदा एकः महात्मा तम् अवदत् - प्रिय _____ (iii) लक्ष्मीः तु चञ्चला भवति अतः प्रथमम् आयसाधनाय प्रयत्नं कुरु अपि च धनस्य _____ (iv) कुरु, दीनानां सहायतां कुरु इति। कुपितः श्रेष्ठिपुत्रः अवदत् - _____ (v) किं भविष्यति इति विचार्य अद्यतनीयं सुखं न त्यजामि इति। महात्मा उक्तवान् - प्रिय मित्र! एवम् _____ (vi) भवतां स्वास्थ्यधनम् अपि नष्टं भविष्यति इति। सः श्रेष्ठिपुत्रः न अमन्यत। _____ (vii) सः मार्गेषु _____ (viii) याचते स्म। तस्य शरीरे _____ (ix) जाताः। तेभ्यः रुधिरं स्रवति स्म। महात्मा अतीव दुःखी अभवत्। तेन उक्तम् - नूनम् _____ (x) विपन्मूलम्।

मञ्जूषाः सदुपयोगं, व्रणाः, रोटिकाखण्डान्, श्वः, अपव्ययं, दुर्व्यसनैः, कालान्तरे, बन्धो, असंयमः, आचरितम्।

**4.** अधोलिखितपदानां सहायतया पञ्चवाक्येषु संस्कृतेन ‘अक्रोधः परमं सुखम्’ इति विषयस्य वर्णनं कुरुत -

मञ्जूषाः क्रोधः, विवेकं, हितम्, अहितम्, नाशयति, न पश्यति, स्वास्थ्यं, अनेके रोगाः, रक्तचापः, बालान्, ताडयति, वर्धते, स्वयम्, अशान्तः, आचरति, पापकर्म, मद्यद्रव्याणां, सेवनम्, महाशत्रुः, अक्रोधेन, प्राप्नोति, परमां, शान्तिम्।

## Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

**5.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिविच्छेदं कुरुत -

(i) सत्यमेव जयति नानृतम्।
(ii) येनाक्रमन्त्ऋषयो ह्याप्तकामाः।
(iii) तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
(iv) दुर्गं पथस्तत् कवयो वदन्ति।
(v) तदन्यत्र गम्यताम् इति।
(vi) किन्नु खलु असाध्यं दृढसङ्कल्पवताम्?

**6.** अधोलिखितेषु वाक्येषु रेखाङ्कितसमस्तपदानां विग्रहः लेख्याः -

(i) अनेन एव सम्पादिताः युगभेदाः।
(ii) आः, किमेतेन वः प्रणहरेण कथाप्रसङ्गेन?
(iii) राज्यं हि नाम धर्मवृत्तिपरकस्य नृपस्य कृते महत्कष्टदायकम्।
(iv) ततः प्रविशति आसनस्थः चाणक्यः।
(v) किम् अस्थाने महान् प्रजाधनापव्ययः?
(vi) सर्वे कक्षायां यथास्थानम् उपविशन्ति।

**7.** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृति-प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत -

(i) सम्पन्नम् अशनम् _____। (अश्+तव्यत्)
(ii) कञ्चिद् जनम् _____ इच्छामि। (नि+मन्त्र+तुमुन्)
(iii) दीर्घं _____ भोः! दारिद्र्यं खलु पुरुषस्य सोच्छ्वासं मरणम्। (नि+श्वस्+क्त्वा > ल्यप्)
(iv) आर्य! दिष्ट्या खलु _____ असि। (आ+गम्+क्त)
(v) अहम् अन्यत्र _____ एव गच्छामि। (भुज्+क्त्वा)
(vi) चारुदत्तः पूर्वं _____ आसीत्। (धन+मतुप्)
(vii) चारुदत्तस्य _____ अन्यत्र भुक्त्वा गच्छामि। (दरिद्र+तल्+तृतीया)
(viii) अद्य छात्रैः _____ कृता। (प्र+स्तु+क्तिन्)

**8.** अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् -

(i) अद्भिः गात्राणि _____। (शुध्यति/शुध्यन्ति)
(ii) दुर्गं पथस्तत् कवयः _____। (वदन्तु/वदन्ति)
(iii) एनम् एव आश्रित्य _____ परमेष्ठिनः पराद्धसंख्या। (भवन्ति/भवति)
(iv) गायत्री अमुम् एव _____। (गायति/अगायन्)
(v) चन्दनवारिणा यूयं भूमिं शीघ्रम् _____। (सिञ्चत/सिञ्चन्ति)

OR

OR

**8.** अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत -

(i) न खलु आर्यचाणक्येन अपहृतः _____ चक्षुषो विषयः।
(ii) आः, किमेतेन वः _____ कथाप्रसङ्गेन?
(iii) अयम् आगतः एव _____ चन्द्रगुप्तः।
(iv) विरम विरम _____ दुर्व्यसनात्।
(v) _____ वैतालिकाभ्यां सुवर्णशतसहस्रं दापय।

मञ्जूषा: देवः, अस्मात्, अतिशयरमणीयः, आभ्याम्, प्राणहरेण।

**9.** अधोलिखितेषु वाक्येषु कोष्ठकशब्दैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) कथं स्पर्धते _____ सह दुरात्मा राक्षसः। (अस्मद्)
(ii) आर्य! _____ एव अहम् आर्यस्य चरणयोः प्रेषितः। (देव)
(iii) अस्मिन् समये किं _____ इति प्रतिषिद्धः? (कौमुदीमहोत्सव)
(iv) अनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह _____। (परिजन)
(v) _____ पूर्वतः लेहनगरम् अस्ति। (सिन्धुनदी)

## Section खण्ड घ — पठितांश-अवबोधनम्

**10.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -

(क) गद्यांशः:
वयं वर्तमानकाले सङ्गणकस्य प्रयोगं कुर्मः, परन्तु यदि आर्यभटेन शून्यस्य आविष्कारः न कृतः स्यात् तर्हि संगणकभाषाया: जन्म एव न अभविष्यत् यतः तत्र तु एकं शून्यञ्च द्वे एव संख्ये महत्त्वपूर्णे। अपि च सूर्यं प्रति पूर्वाभिमुखा पृथिवी 365.25 वारं प्रतिवर्षं भ्रमति। आधुनिकैः वैज्ञानिकैः अपि तथैव मन्यते।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) आर्यभटेन कस्य आविष्कारः कृतः? (ii) पृथिवी कं प्रति परिभ्रमति?

(ब) पूर्णवाक्येन उत्तरत - संगणकस्य कृते कति संख्ये महत्त्वपूर्णे?

(स) यथानिर्देशम् उत्तरत - (i) 'भ्रमति' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'प्राचीनकाले' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?
(द) (i) 'पूर्वाभिमुखा' इति विशेषणस्य विशेष्यं किम्? (ii) यः विज्ञानं जानाति सः कः?

(ख) पद्यांशः:
वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः। करणं परोपकरणं येषां केषां न ते वन्द्याः।।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) सज्जनानां हृदयं कीदृशं भवति? (ii) सज्जनानां करणं कीदृशम्?

(ब) पूर्णवाक्येन उत्तरत - के खलु जनैः वन्दनीयाः एव?

**10.** (continued)

(स) (i) 'मुखम्' इत्यस्य कृते किं पदम् अत्र प्रयुक्तम्? (ii) 'अमृतम्' इति अर्थे किं पदम् अत्र प्रयुक्तम्?
(द) (i) 'पूजनीयाः' इति अर्थे किं पदम् अत्र प्रयुक्तम्? (ii) 'सुधामुचः' इति विशेषणस्य विशेष्यं किम्?

(ग) नाट्यांशः:
(परिक्रम्य अवलोक्य च) एष तत्रभवान् चारुदत्तः यथाविभवं गृहदेवतानि अर्चयन् इत एव आगच्छति। यावदेनम् उपसर्पामि। (ततः प्रविशति चारुदत्तो, विदूषकः, चङ्केरिकाहस्ता चेटी च)
चारुदत्तः: (दीर्घं निःश्वस्य) भोः! दारिद्र्यं खलु नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्।
विदूषकः: अलम् इदानीं भवान् अतिमात्रम् सन्तप्तुम्। दानेन विपन्नविभवस्य बहुलपक्षचन्द्रस्य ज्योत्स्नापरिक्षय इव भवतः रमणीयोऽयं दरिद्रभावः।
चारुदत्तः: न खल्वहं नष्टां श्रियम् अनुशोचामि। गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति। कुतः - सुखं हि दुःखान्यनुभूय शोभते यथान्धकारादिव दीपदर्शनम्।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) दुःखानि अनुभूय किं शोभते? (ii) दीपदर्शनं कस्मात् अनन्तरम् अधिकं शोभते?

(ब) पूर्णवाक्येन उत्तरत - चारुदत्तस्य दरिद्रभावः कस्य परिक्षयः इव शोभते?

**10.** (continued)

(स) यथानिर्देशम् उत्तरत - (i) 'रमणीयः' इति विशेषणस्य विशेष्यं किम्? (ii) 'कृष्णपक्षस्य' अर्थे किं पदम् अत्र प्रयुक्तम्?
(द) (i) 'शोभते' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'विगतम् ऐश्वर्यम् यस्य स तस्य' इति पदस्य स्थाने किं पदम् अत्र प्रयुक्तम्?

**11.** यथानिर्देशं प्रश्नान् उत्तरत -

(i) 'सूर्यः एव प्रकृतेः आधारः' इति पाठस्य सन्दर्भग्रन्थ: क:?

(ii) 'न निष्प्रयोजनं प्रभुभिः आहूयन्ते अधिकारिणः' इति कः कं प्रति कथयति?

**12.** प्रत्येकम् अंशस्य प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत -

(i) 'मनः सत्येन शुध्यति।'
भावार्थाः: (क) मनसा सत्यस्य आचरणं करणीयम्। (ख) यः सत्यं वदति स शुद्धः भवति। (ग) यदि मनुष्यः सत्याचरणं करोति, तस्य मनः अपि पवित्रं भवति।

(ii) 'क्षुरस्य धारा निशिता दुरत्यया।
दुर्गं पथस्तत् कवयो वदन्ति।।'
भावार्थाः: (क) छुरिकायाः धारा तीक्ष्णा भवति, दुःखेन गन्तुं शक्या, एवं महापुरुषाः ज्ञानस्य मार्गम् अतीव कठिनम् इति वर्णयन्ति। (ख) छुरिकायाः धारायां ज्ञानिनः स्वज्ञानेन चलितुं शक्नुवन्ति, सः मार्गः अन्येभ्यः कठिनः भवति। (ग) यः छुरिकायाः धारायाः उपरि चलति, सः सपदि ज्ञानी भवति, महापुरुषः च भवति।

OR

OR

**12.** अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत -

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।

भावार्थः: सज्जनानां गृहेषु अतिथीनां कृते (i) _____, वासाय स्थानम् (ii) _____, मधुरवाण्या (iii) _____ इति भावानाम् कदापि (iv) _____ न भवति। ते सर्वदा अतिथिसत्काराय उद्यताः भवन्ति।

मञ्जूषा: अभावः, जलम्, आसनम्, सत्कारः।

**13.** अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत -

(अ) पद्यांशः: विद्यमाना गतिः येषामन्यत्रापि सुखावहा। ते न पश्यन्ति विद्वांसो देहमङ्गं कुलक्षयम्।।
अन्वयः: येषाम् अन्यत्र अपि (i) _____ सुखावहा (ii) _____, ते विद्वांसः (iii) _____ कुलक्षयं (iv) _____ पश्यन्ति।

(ब) पद्यांशः: अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
आश्रितव्योऽथवा दुर्गः, नान्या तेषां गतिर्भवेत्।।
अन्वयः: अशक्तैः (i) _____ शत्रोः पलायनम् (ii) _____ अथवा (iii) _____ आश्रितव्यः। तेषाम् (iv) _____ गतिः न भवेत्।

**14.** अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा पुनः लिखत -

क: (i) अरुणः एषः प्रकाशः (ii) एषः भगवान् मणिः (iii) अयम् एव वत्सरम् (iv) अयम् एव कारणम्

ख: (अ) द्वादशसु भागेषु विभनक्ति। (ब) षण्णाम् ऋतूनाम्। (स) भगवतो मरीचिमालिनः। (द) आकाशमण्डलस्य।

**15.** अधोलिखितवाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत -

(अ) 'आर्यप्रसादात् अनुभूयते एव सर्वम्।' (i) आर्यस्य भवनात् (ii) आर्यस्य कृपया (iii) आर्यस्य प्रसन्नतया।

(ब) 'न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टते।' (i) उद्देश्यं विना (ii) उद्देश्यस्य अन्तरालात् (iii) योजनायाः अनन्तरम्।

(स) 'अतः इदानीं दुर्गसंस्कारः प्रारब्धव्यः।' (i) कठिनमार्गः (ii) दुर्गस्य दृढीकरणम् (iii) दुर्गे यज्ञादिकृते प्रबन्धः।

(द) 'किन्तु न कदाचित् आर्यस्य निष्प्रयोजना प्रवृत्तिः।' (i) कार्यवशात् (ii) उद्देश्यहीना (iii) परियोजना-पूर्णा।

## Section खण्ड घ — सामान्यः संस्कृतसाहित्यपरिचयः

**16.** अधोलिखितानां कवीनां देश-काल-कृतीनां यथानिर्देशं नामानि लिखत -

(अ) (i) विष्णुशर्मा (ii) भारविः (iii) आर्यभटः (iv) चरकः [काचिद् एका कृतिः]

(ब) (i) भर्तृहरिः (ii) विष्णुशर्मा (iii) बाणभट्टः [कालः]

(स) (i) अम्बिकादत्तव्यासः (ii) भासः (iii) श्रीहर्षः [जन्मस्थानम्]

अथवा (OR)

OR

**16.** (अ) निम्नलिखितवाक्येषु मञ्जूषायाः पदानि चित्वा रिक्तस्थानपूर्तिः क्रियताम् -

(i) केन-उपनिषद् _____ वेदेन सह सम्बद्धा?
(ii) नाटकं _____ भेदः।
(iii) नाट्यशास्त्रस्य रचयिता _____ अस्ति।
(iv) छन्दोयुक्तरचना _____ कथ्यते।
(v) अष्टाध्यायी _____ ग्रन्थः वर्तते।
(vi) _____ नाटकस्य श्लोकचतुष्टयम् अतिप्रसिद्धम्।
(vii) पञ्चतन्त्रस्य लेखकः _____ अस्ति।
(viii) अश्राव्यं खलु यद्वस्तु तदिह _____ मतम्।
(ix) मुद्राराक्षसनाटके _____ अभावः वर्तते।
(x) अम्बिकादत्तव्यासः _____ ऐतिहासिक-उपन्यासरचयिता अस्ति।

मञ्जूषा: पद्यम्, भरतमुनिः, रूपकस्य, सामवेदेन, आधुनिकयुगस्य, व्याकरणस्य, विष्णुशर्मा, अभिज्ञानशाकुन्तलस्य, नायिकायाः, स्वगतम्।

(ब) पद्यकाव्यस्य पञ्च विशेषताः लिखत। Write five characteristics of poetic-literature.

**- End of Question Paper -**